**वरासन** न० वराय वरणीयायास्यते चिप्यते अस–ल्युट्। १जवापुष्पे शब्दमा०। कर्म०। २उत्तमे आसने न०। वरं पतिमस्यति अस–ल्यु। ३पिद्गे जारे पु०। वरान् श्रेष्ठानपि अस्यति दूरीकरोति ल्यु। ४द्वारपाले च पु० विश्वः। [२खड्गधरे च धरणिः।

**वरासि** पु० वरायावरणायास्यते अस–इन्। १स्थूलवस्त्रे

**वराह** पुस्त्री० वराय अभीष्टाय मुस्तादिलाभाय आहन्ति खनति भूमिम् आ+हन–ड। १शूकरे अमरः स्त्रियां ङीष्। २यज्ञवराहाख्ये भगवतोऽवतारभेदे पु० ३पर्वत-भेदे ४मुस्तके ५मानभेदे मेदि०। ६शिशुमारे ७वाराही-कन्दे पु० राजनि० दशाष्टादशद्वीपमध्ये द्वीपभेदे च। "गन्धर्वो वरुणः सौम्यो वराहः कङ्क एव च। कुसु-इश कसेरुश्च नागो भट्टारकस्तथा। चन्द्रेन्द्रू मलयाः शङ्कु यवाङ्कुक सभक्तिमान्। ताम्राङ्कुश कुमारी च तत्र द्वीपा दशाष्टभिः" शब्दमा०।

**वराहकन्द** पु० वराहप्रियः कन्दः शा०त०। स्वनामख्याते कन्दभेदे राजनि०। [शब्दर०।

**वराहकान्ता** स्त्री वराहाणां कान्ताऽभीष्टा। वराहकन्दे

**वराहक्रान्ता** स्त्री वराहेण क्रान्तेव। १लज्जालुलतायाम् शब्दच०। २वाराह्यां (चामरालु) सुभूतिः।

**वराहिका** स्त्री वराही भक्षकत्वेनास्त्यस्याः ठन्। कपि-कच्छाम् राजनि०।

**वराही** स्त्री वराही भक्षकत्वेनास्त्यस्याः अच् गौरा० ङीष्। १भद्रमुस्तायाम् २वराहकन्दे च राजनि०।

**वरिवस्** न० वृ+असुन् वुट् च। १पूजने २धने च निघण्टुः।

**वरिवसि(स्थि)त** त्रि० वरिवः पूजनं करोति क्यच्–क्त वा यलोपः। पूजिते अमरः। [२शुश्रूषायाम् अमरः।

**वरिवस्या** स्त्री वरिवस्+करणार्थे क्यच्-भावे अ। १पूजने

**वरिष्ठ** त्रि० अतिशयेन उरुः इष्ठन् वरादेशः। १उरुतमे २तित्तिरिविहगे पुंस्त्री० स्त्रियां ङीष् ३नागरङ्गवृक्षे पु०राजनि०। ४ताम्रे न० अमरः। ५मरिचे न० मेदि० ६वरुणे अजयः। ७आदित्यभक्तायां स्त्री राजनि०।

**वरी** स्त्री वरी शतावरी पूर्वपदलोपः। १शतावर्याम् अमरः २सूर्यपत्न्याञ्च त्रिका०।

**वरीयस्** त्रि० अतिशयेन उरुः श्रेष्ठः ईयसुन् वरादेशः। १उरुतमे विष्कम्भादिषु मध्ये २अष्टादशे योगभेदे पु० ज्यो०त०। [३श्रेष्ठे अमरः।

**वरी(ली)वर्द** पु० वृभ–यङ्–लुक् अच् पृषो० रस्य वा लः।

**वरुट** पुंस्त्री० म्लेच्छजातिविशेषे स्त्रियां ङीष्। "पुलिन्दा नाहला निष्ट्याः शबरा वरुटा भटाः। माला भिल्लाः किराताश्च सर्वेऽपि म्लेच्छजातय" हेमच०।

**वरुड** पु० वृ–उडन्। अन्त्यजजातिभेदे स्त्रियां ङीष्। "रजकश्चर्मकारश्च नटो वरुड एव च" मनुः।

**वरुण** पु० वृ–उनन्। पश्चिमाशापतौ १जलेशे स्वनामख्याते देवभेदे अमरः। २जले मेदि०३सूर्ये च विश्वः। ५द्वीप-भेदे वराहशब्दे दृश्यम्। ६काशीस्थे नदीभेदे स्त्री। काशीस्थनदीभेदस्योत्पत्त्यादिकं वामनपु० ३अ० उक्तं यथा "प्रयागे वसते नित्यं योगशायी तु विश्रुतः। चरणाद्-क्षिणात्तस्य विनिर्याता सरिद्वरा। विश्रुता वरु(र)णेत्येवं सर्वपापहरा शुभा। सव्यात् पादात् द्वितीया च असि-रित्येव विश्रुता। ते उभे च सरिच्छ्रेष्ठे लोकपूज्ये बभूवतुः। तयोर्मध्ये तु यो देशस्तत्क्षेत्रं योगशा-यिनः। त्रैलोक्यप्रवरं तीर्थं सर्वपापप्रमोचनम्। न तादृशोऽस्ति गगने न भूम्यां न रसातले। तत्रास्ति न-गरी पुण्या ख्याता वाराणसी शुभा"। ७स्वनामख्यातवृक्षभेदे पु०अमरः "वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान्। निहन्ति गुल्मवाताश्र क्रिमींश्चोष्णोऽग्निदीपनः। कषायो मधुरस्तिक्तः कटुको रूक्षको लघुः" भावप्र०।

**वरुणात्मजा** स्त्री वरुणस्य जलस्यात्मजेव जन्यत्वात्। जल-भवे मद्ये अमरः। [पत्न्याम् जटा०।

**वरुणानी** स्त्री वरुणस्य पत्नी ङीष् आनुक् च। वरुण-

**वरुत** न० वृ–उत। उत्तरीयवस्त्रे सि० कौ०

**वरूथ** न० वृ–ऊथन्। तनुत्राणे हेमच० २चर्मणि मेदि०। ३रथगुप्तिस्थाने परप्रहाररक्षार्थमाहृते स्थाने पु०अमरः।

**वरूथिनी** स्त्री वरूथोऽस्त्यस्याः इनि। सेनायाम् अमरः।

**वरेण्य** न० वृ–एन्य। १कुङ्कुमे राजनि० २प्रधाने ३प्रार्थ-नीये च त्रि० अमरः। [वारेन्द्र विप्रभेदे।

**वरेन्द्री** स्त्री गौडदेशे त्रिका०। साभिजनोऽस्य अण्।

**वरोट** न० वरास्युटानि दलान्यस्य। मरुवकपुष्पे अमरः।

**वरोल** पुंस्त्री०वृ–ओल। वरटे कीटभेदे त्रिका०। स्त्रियां ङीष्

**वर्कर** पु० वृक–अरन्। १तरुणपशौ अमरः २मेषशावके भ-रतः। ३छागमात्रे पुंस्त्री० स्त्रियां ङीष् ४परिहासे मेदि०

**वर्ग** पु० वृज–घञ्। १सजातीयसमूहे अमरः। यथा मनुष्य-वर्गः पशुवर्गः। समानधर्मिभिः प्राण्यप्राणिभिः कृते २संघे च यथा कवर्गः चवर्गः। अत्र कत्वखत्वादिना